CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.18

Coll. No. 199

Title Gosamvardhana-mahatmya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 199 Subject : Dharmaśāstra ritual

Title : Vasanavardhanamahotsava (Nirṇaya?)

Author : Nārāyaṇa ? Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. :

Size : 4.9" x 5.4" Extent : 6 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : Seems to be complete.

श्रीकृष्णायनमः।। वंदेचिदानंदरसैकरूपंवृंदावनस्थंव्रजपालपुत्रं।।तमालनीलंकलधौत
कीर्तिगीतालताऽलिंगितमादरेण।।१।।नमःश्रीकृष्णचैतन्यनाम्नासर्वत्रविश्रुते।।आविरा
सीद्गौडदेशेसर्वजीवहिताययः।।२।।श्रीकृष्णचैतन्यमहामुनींद्रपादारविंदंप्रणिधायचित्ते
।।सदासदाचारनिविष्टनिष्ठोनारायणोनिर्णयमातनोति।।३।। अथगोवर्धनोत्सवंतुका
र्त्तिकशुक्लप्रतिपद्दिवसेकुर्यादिति।।प्रतिपद्दिवसेकुर्याद्गोवर्धनमहोत्सवमितिवाक्यात्।।सातु
दर्शविद्धानकार्येति।।सर्वोत्सवेषुपरविद्धाया एवतिथेर्ग्रहणात्।।नात्र।।अमाप्रतिपदोर्योगि
क्रिडनीहिगवीमता।।परविद्धेतुयःकुर्यात्पुत्रदारधनक्षयः।।इतिवाक्याद्गोवर्धनोत्सवोपित
थैवकर्त्तव्यइतिक्रमितव्यं।।उक्तवाक्येउत्सवपदाऽसत्वात्।।ननुगोपूजनस्योत्सवांगत्वेन
गोपूजनपदोपादानेनैवतदुत्सवोपितत्रैवकर्त्तव्यइतिप्रतीयतइतिचेन्न।।गौणीभाव
प्रतिपादनेविधानाऽसत्वात्।।अतएवपृथक्पृथक्कर्मविधानं।।तथाहिस्कंदपुराणे।।प्रात
र्गोवर्धनंपूज्यद्यूतंचापिसमाचरेत्।।भूषणीयास्तथागावःपूज्याश्चावाहदोहनाः।।इति।।
नन्वत्रैकाधिसर्वकर्मविधानदर्शनाद्गौणीभावप्रतीयते।।नैवं।।तथात्वेतुगोवर्धनोत्स
वानंतरमतिसमीपद्यूतकर्मपदोपादानेनद्यूतस्याप्युत्सवांगत्वंस्यात्।।यदिगोपूजनस्यो कि॰१

केवल १

त्सवांगत्वं स्यात्तर्हि अमाप्रतिपद्योर्योगे क्रीडनं दिगवामं तमित्यादिपूर्वोदाहृतवाक्ये गोक्रीड
अं२ नपरोपादानमर्थं न स्यादेव॥ अगौणी भावे विचार्यमाणे हि अपगत्सवे गोपूजनं त्वंगं॥ एवं स
ति [illegible] मुख्यस्योत्सव [illegible] स्यैव पा वो ३
दानमावश्यकं स्यात्॥ मुख्यस्य गौणाधीनत्वानौचित्यात्॥ तस्मान्नात्र गौणी भावः॥ ननु श्रीमद्भ
गवत्कृत गोवर्धनोत्सवे गोपूजनं दृश्यत इति चेत्सत्यं॥ तत्तु त्सवार्थे भिन्नं गोपूजनं॥ अंगत्वेन भ
वितुमर्हति॥ तथासति तु गोवर्धनोत्सवनिर्णयः कर्तव्यः॥ तेनैव तदंगगोपूजननिर्णयसिद्धेः॥
स वस्तुतस्तु तदर्थे गोपूजनविधानमेव नास्तीति किं वक्तव्यमिति॥ किंचामाप्रतिपद्योर्योगे क्री
डनं दिगवामं तमित्यादिवाक्यसिद्धगोपूजनं यन्नतु त्रिदिवसात्मकदीपोत्सवगतं गोपू
जनं भिन्नविषयं पूर्वोक्तहेतुबलात्॥ ईषासितचतुर्दश्यामिंदुक्षयतिथावपि॥ ऊर्जादौ वा भ
वेत्स्वातिस्तदा दीपावलिः स्मृता॥ दीपावलीति संज्ञा स्यादूर्ध्वादित्रिदिने क्रमात्॥ तैलेल
क्ष्मीर्जले गंगा दीपावल्यां वसेत्सदा॥ अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत्॥ अपामा
र्गं भ्रामयित्वाथ कुर्याद्यमतर्पणं॥ नरकाय प्रदातव्यो दीपः संपूज्य देवताः॥ अपमायामाश्वि
[illegible] तिलकर्म विधाय च॥ दीपदानं ततः कुर्यात्प्रदोषे च तथोल्मुकं॥ नीराजनं द्वितीयेह्नि प्रा

तं काले विधीयते॥ तत्रैव विधिना कार्यं सुरभीणां च पूजनं इति धर्मप्रवृत्तिनिर्बंधोद्धृत व्यासोक्त्या
त्रिहीबसात्मकदीपोत्सवगत गोपूजनदर्शनाच्च॥ किंच॥ उक्तगोपूजनस्य गोवर्धनोत्सवनिमित्तत्वं
यदि स्यात्तर्हि ज्ञात गोवर्धनेऽपूज्ये त्यक्ते तदनंतरं गोपूजनपदोपादानं न स्यात्॥ गोवर्धनोत्सवनिमित्तं
गोपूजनं कर्तव्यमिति विधानाभावे पि श्रीमद्भागवदुक्त गोवर्धनोत्सववदनुकरणादावेव गोबलि
कारमात्रस्योचितत्वात्॥ गवां कुलमलंकृत्येति श्रीमद्भागवतोक्तेः॥ किंच॥ श्रीमद्भागवदुक्त गोव
र्धनोत्सवप्रस्तावे तु गोपूजनं नास्त्येव॥ गवां कुलमलंकृत्य इत्यलंकारमात्रपदोपादानात्॥ तत्रतु गोपू
जनं भिन्नमाम्नातीति॥ [illegible]

[illegible]

[illegible] ॥ प्रकृते तु श्रीमद्गोवर्धनोत्सवानुरोधेनैव तदनुज्ञनितां गमपि कर्त्तव्यमि
स्मी ५ ति गम्यते ॥ पितापुत्रन्यायेन मुख्यबाधस्यान्याय्यत्वात् ॥ तदर्थे द्वित्यकालव्याप्तेरेव ग्रहणं ॥ अत गोवर्ध
नेपुज्य इत्युक्त्या कर्मकालव्याप्तेराधिक्यात् ॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिरिति व
चनात् ॥ किंच ॥ सर्वोत्सववत्त्राप्यहद्वयव्याप्तेरेव ग्रहणं ॥ सर्वोत्सवस्यैकजातित्वात् ॥ नात्र गोवर्धनोत्स
वो दीपोत्सवस्याङ्गं ॥ तथा वक्तुं वाच्यासत्वात् ॥ पूर्वोदाहृतव्यासोक्त्या त्रिदिवसात्मकदीपोत्सवप्रकरणे
गोवर्धनोत्सव [illegible] गत्वेन पदोपादानासत्वाच्च ॥ स्वतंत्रश्रीमद्भगवदुत्सवे परतंत्रताऽन्याय्यत्वाच्च ॥ किंच
हुना किमपि वक्तुमशक्यं ॥ एतदर्थे ऋषिणोव निर्णयस्य कृतत्वात् तथाहि धर्माब्धौ निबंधसारोध्धृत
वसिष्ठवचनं ॥ प्रतिपत्परविद्धायात्यां स्यात्सा पूजने गवां ॥ नीराजनोत्सवान्यं गे दर्शविद्धा परित्य
जेत् ॥ तत्रैव काशखण्डे विधत्तवत्सवचनं ॥ कार्तिके प्रतिपत्स्वल्पा द्वितीया सकला यदि ॥ तत्रोत्सव
विधिं कुर्यात्सायं मंगलमालिका ॥ तत्रैव धर्माब्धौ व्याघ्रः ॥ कार्तिके प्रतिपच्छुक्ला मुहूर्त्तं वा कला २
यदि ॥ तत्रोत्सवादि कृत्येषु कर्त्तव्या शुभकांक्षिभिः ॥ स्मृतिरत्नाकरेपि वसिष्ठः ॥ मुहूर्त्तमपि
वर्त्तेत प्रतिपत्कार्तिके सिता ॥ उत्सवादिषु कृत्येषु कर्त्तव्या शुभकांक्षिभिः ॥ सत्य त्रादिशत् [illegible]
नवाजिपूजनं नारीनिराजनं च गम्यते ॥ तथाहि स्मृतिरत्नाकरे वसिष्ठः ॥ मुहूर्त्तं वर्त्तते दर्शो मांगल्ये

प्रतिपत्पर्वया त्याज्या पूजनं गवां ॥ नीराजनोत्सवान्योगे दर्शविद्धां परित्यजेत ॥ २ ॥

तद्दिने भवेत् ॥ विद्धापत्यकलत्रादि तत्सर्वं नश्यति ध्रुवं ॥ आश्विने मासि दर्शांते नारीनीराजनं यदि ॥ ना
रीणां तत्र वैधव्यं प्रजानां मरणं ध्रुवं ॥ नंदा संवत्सरादौ तु दर्शविद्धा न कारयेत् ॥ बलेः प्रतिपदं चैव सर्वश्रे
यो विनश्यति ॥ इति ॥ ननु पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमित्युक्त्या पूर्वविद्धाया बलिपूजनविषयत्व
स्य प्रतीयमानत्वादिति चेत्सत्यं तत्परदिने त्र्य लाभविषयं ॥ तथा हि धर्माब्धिवत्सः ॥ प्रतिपत्कार्तिके शुक्ला
यद्दिने स्यात्परेहनि ॥ दर्शविद्धा तदा कार्या वन्ह्यंगादिमहोत्सवे ॥ स्मृतिरत्नाकरेपि वसिष्ठः ॥ मुहूर्तमपि
वर्तेत प्रतिपत्कार्तिके सिता ॥ उत्सवादिषु तत्रैव कर्तव्या शुभकांक्षिभिः ॥ प्रतिपत्स्वल्पमप्यापि यद्दिन भविष्ये ॥
स्यात्परेहनि ॥ पूर्वविद्धा तदा कार्या सिते पक्षे च कार्तिके ॥ धर्मप्रवृत्तावपि ज्योतिःसारोद्धृते ॥ दर्श
विद्धा ग्रहीतव्या प्रतिपत्पूजने गवां ॥ परविद्धा प्रशस्ता स्याद्वन्ह्यंगादिमहोत्सवे ॥ इत्यादि ॥ किंबहुना धर्मा
णीवे माश्विनप्रतिपन्निर्णयेपि प्रस्तावेपि ॥ तत्रैकएव न वचनं ॥ सर्वविनतु यामहा भवेच्च प्रतिपद्यसि ध
नवद्दिकी पुमांसर्वसौख्यकरी तथा ॥ तत्रैव स्कंदपुराणवचनमपि ॥ अमायुक्ता मुहूर्तं स्यान्नीत
चैवापरे दिने ॥ वत्सपर्वदिने ... तिथिर्याह्या प्रसंगा ॥ तत्रैव ब्रह्मपुराणवचनमपि ॥ अमायुक्ताच धर्माब्धिवे
र्तव्या पुत्रपौत्रै ... सर्वधर्मफलेप्सुभिः ॥ ...लघु ॥ चैत्रस्य प्रतिपच्छुक्ला
दर्शविद्धा तदा कार्या यद्दिने स्यात्परेहनि कैवात्र धर्माब्धिवत्सः संवत्सरप्रतिपन्निर्णयेपि ॥
तथैवाश्विनकार्तिके ॥ दर्शविद्धा तदा कार्या यद्दिने स्यात्परेहनि ॥ अष्टाधिपतिर्विज्ञेयो यक्षो वाहयगेपि च ॥ अत्रादिरासो
नत्र नारदवचनं ॥ चैत्रादौ प्रतिपद्याच्च मुहूर्तद्वयसंयुता ॥ अष्टाधिपतिर्विज्ञेयो ... मासि च भारते तिहेमाद्रौ ब्राह्मे ॥ पराः
२ तथा तिस्रो ह्येताः पराः प्रोक्ताः तिथयः कुरुनंदन ॥ कार्तिकाश्वयुजो मासि चैत्रे मासि च भारते परयुताः ॥ इति निर्णयसिंधुकारः ॥

६१

अन्यमासपरैतिबोध्यव्यी॥ चैत्रस्यप्रतिपच्छुक्ला तथैवाश्विनकार्त्तिकी॥ इतिपूर्वोदाहृतब्रह्मवाक्ये आश्विनका

र्त्तिक्योविधानात्॥ तत्रैवस्कन्दगर्गः॥ अमायांतिपत्तेःसंधिर्यदिनस्यात्परेहनि॥ तत्पूर्वदिनेसायंनागमर्गस्य

वचनंयथा॥ दिनद्वयेप्रतिपद्दृश्यतेनचेदेवअथवानचेत्॥ तद्विषये सनत्कुमारः॥ उदयेद्वितियेचैव

नोद्भवेयुक्ता॥ तथापूर्वदिनेसायंमार्गपालीबंधनंप्रेक्षणमभ्यर्च्य॥ तत्रैवववसिष्ठोपि॥ मुहूर्त्तंचैत्रं तेद्यामी

गत्यैतद्दिनेभवेत्॥ धनापत्यकलत्रादिनाशःस्यादितिनिश्चितं॥ नामस्वंडेपि॥ प्रतिपदुदयेकिंचित्तद्दि

नायासस्कन्द्यायदि॥ तत्रोत्सवविधिंकुर्यात्सर्वदासुखसंपदः॥ तत्रैवगर्गसंहितायामपि॥ कलामात्राप्यु

चोदयोमीगात्यैतद्दिनेकृते॥ वित्तापत्यकलत्रादितत्सर्वंनश्यतिध्रुवं॥ भास्करोदयमारभ्य मुहूर्त्तंचैकलो

यदि॥ प्रतिपत्सैववर्ज्या च यथापुत्रहानिदा॥ तत्रैवभोगेस्त नीयपरान्तमे॥ उदयव्यापिनीयाचा प्रति

पत्सर्वदामिता॥ तत्रोत्सवादिकंत्वेषुनिषिद्धेपिनदुष्यति॥ तत्रैवस्कन्दपुराणेपि॥ प्रतिपदुदयेयत्रदिनद्वयेपिव

र्द्धते॥ तत्रोत्सवादौपूर्वैवविद्धासाम्येद्वयेपिच॥ तत्रैववसिष्ठसंहितायामपि॥ रवेरुदयभारस्य प्रतिपत्स

र्वनाडिका॥ प्रतिपत्सैवकर्त्तव्यानापरसाधर्महानिदा॥ इत्यत्र सर्वथादर्शविधानकार्येतिसिद्धं॥ किंच॥ वेधस्य

तुज्योतिःशास्त्राधीनत्वात्ज्योतिःशास्त्राणांतुपरस्परसाम्याभावात्कैमत्रवेधनिश्चयंकुर्वतुंशक्यतइत्याशंक्याद ४३

वार २ मध्वाचार्यस्तत्स्मृतिसद्भावनिर्णयविवरणेध तत्स्कंदपुराणवाक्येनैव॥ ब्रह्मपक्षेविजानीयात्कर्मचाद्येन

तान्निधे॥ सूर्यपक्षेद्वितीयेचद्रगणितंद्वापरेतथा॥ आर्यपक्षंकलौयुगेचांत्येज्ञानीयात्तुविशेषतः॥ विशेषस्तु

निबंधचंद्रोदयेस्मृतिरत्नाकरेचभविष्योत्तरपुराणवचनं॥ वृद्धाचार्यद्विजयेब्रह्मसाम्येसौरःमतपरं
॥कस्मिन्धर्मेषुकःश्रेयान्वृहस्पतुधर्मेतुयोधिकः॥इति॥ अत्रकेचित्तुनेदंरूपस्मदनुदृष्टेयी॥स्वशिष्टपरंपराविरोधा
त्॥शिष्टाचारस्यापिधर्मत्वात्॥शिष्टाचारःस्मृतिर्वेदास्त्रिविधंधर्मलक्षणमितिस्मृतिश्रौस्कत्रनिबंधो
धृतमनूवचनादित्याहुः॥तत्रोच्यते॥यद्यप्येवंतथापिश्रुत्यविरोधेनभवितुमर्हति॥यस्मिन्कुलेयनात्वा
रःपारिपर्याक्रमागतः॥श्रुतिस्मृत्यविरोधेनसदाचारसउच्यते॥इतिदेवलोक्तत्वात्॥श्रुतिस्मृत्युदितःस
म्यक्साधुभिश्चैवसेवितः॥तमाचारंनिषेवेतइत्यादिना॥यस्तैरनुष्ठितोधर्मःश्रुतिस्मृत्योश्चसंगतः॥स
दाचारःसवैश्रेष्ठोदेवदेवेनभानुना॥इत्येतेनसौरपुराणेद्विमाध्यायेदर्शनाच्च॥अत्रतात्पर्यार्थस्तुश्रुतिवि
रुद्धःशिष्टाचारोपिनप्रमाणं॥भवितुमर्हति॥सर्ववेदाविरोधेनप्रमाणंनान्यथाभवेदितिवासिष्ठलिंगेऽपि
माधवाचार्योक्तेः॥स्मृतिर्वेदविरुद्धेनपरित्याज्यायथाभवेत्॥तथैवलौकिकंवाक्यंस्मृतिबाधात्परित्यजेदिति
प्रथिवचंद्रनिबंधोधृतचतुर्विंशतिमताच्च॥ननुशिष्टाचारःस्मृतिर्वेदास्त्रिविधंधर्मलक्षणमित्यत्रप
र्वपूर्वबलिष्ठमितिन्यायेनशिष्टाचारस्यपरस्परंतरबलवत्त्वमाभातीतिचेत्सत्यंतत्रोच्यते॥शिष्टाचारस्य
प्रामाण्यंतुश्रुतिस्मृत्यमूलविषयत्वेनैव॥अन्यथाशिष्टत्वासंभवात्॥पूर्वोक्तवाक्यविरोधाच्च॥काशीखंडेपि
पूर्वार्धेद्वितीयाध्याये॥श्रुतिस्मृतिपुराणज्ञाब्राह्मणाःपरिकीर्तिताः॥तदुक्ताचारचरणाइतरेनामधारकाः॥
श्रुतिस्मृतीतिनेत्रेद्वेपुराणंहृदयंस्मृतं॥ श्रुतिस्मृतीभ्यांहीनोंधःकाणःसत्वेकयाविना॥पुराणहीनाद्धृद

न्यायकारिणौ धावपितौवरौ॥श्रुतिस्मृत्युदितोधर्मः पुराणेपरिपठ्यते॥तच्चाम्नायगौरवेयासर्वत्रसुखमिच्छ
ता॥नदेयाद्विजमात्रायदातारंसोप्यधोनयेदिति॥किंच॥पूर्वोक्तमनुस्मृतिवाक्यगतपूर्वपूर्वोपादानकारण
तुइत्थं॥श्रुतिद्वै धस्यस्मृत्यादर्शनात्तद्व्यवस्थायापिस्मृतिवाक्येनैवविधानाच्चेतिविशेषणद्वये
नैवनिगमात्पूर्वस्मृतिपदोपादानमपिसंगच्छते॥श्रुतिविरोधेतुनस्मृतिनामपिप्रामाण्यं॥श्रुतिस्मृति
पुराणानांविरोधोयत्रदृश्यते॥तत्रश्रौतंप्रमाणंस्यात्तयोर्द्वैधेस्मृतिर्वरा॥इतिव्यासस्मृतौप्रथमाध्या
येविधानात्॥विरोधस्वरूपंचोक्तंभट्टपादैः॥यावद्वेदैकश्रुतौकर्मस्मृतौचान्यत्प्रतीयते॥तावत्तयोर्विरुद्धत्वे
श्रौतानुष्ठानमिष्यते॥इति॥किंच॥स्मृत्यपेक्षयापूर्वतरशिष्टपदोपादानेतु॥श्रुतिस्मृतिवाक्यानांविरोध
परिहारादिकस्यशिष्टाधीनत्वात्श्रुतिस्मृत्युक्तधर्मप्रवर्त्तकत्वेनगुरुत्वाच्च॥इति॥शिष्टैःकयारीत्यावि
रोधपरिहारा दिकर्तव्यमित्यपेक्षा यामाह॥उदितानुदितहोमवत्॥श्रुतिद्वैधेतुयत्रस्यात्तत्रधर्मावु
भौस्मृतौ॥स्मृतिद्वैधेतुविषयःकल्पनीयःपृथक्पृथगितिवाक्यात्न्यायावलंबनेनैवविषयव्यवस्था
कल्पनीयेति॥अतएव॥स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः॥अर्थशास्त्रात्तुबलवद्धर्मशास्त्र
मितिस्थितिरितिमधुसूदनसरस्वतीकृतगीताभाष्योद्धृतयाज्ञवल्क्यवचनमिति॥अत्रन्यायस्यापिध
र्मशास्त्राविरोधेनबलवत्त्वमित्यपिव्याख्यातं॥तदेवाहहेमाद्रौस्मृत्यंतरे॥पुराणंमानवोधर्मःसांगोवे
दश्चिकित्सितं॥आज्ञासिद्धानिचत्वारिनहंतव्यानिहेतुभिः॥इति॥श्रुत्यादिवाक्यानांपरस्परविरोधेतुन्या

यस्यावश्यकत्वमाह हेमाद्रौ आपस्तंबः॥ आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना॥ यस्तर्केणानुसंधत्ते स धर्मं
वेति तत्वतः॥ नेतर इति वा पाठः॥ तस्मादेवोक्तं हेमाद्रौ देवीपुराणे॥ ये न्यायविदः शांता धर्मशास्त्रार्थवेदिनः॥ स्व
कर्मनिरता दांतास्तेषां वचनमौषधं॥ तत्रैव शारदापुराणेपि॥ पुराणन्यायमीमांसाधर्मशास्त्रार्थचिंतकाः॥
सदाचारपरा ये वै तदुक्तं यत्नतश्चरेदित्यादि॥ इत्यत्रापि श्रुतिस्मृत्यादियुक्तशिष्टाचार इत्यनुक्तसिद्धं॥ ततउ
क्तशिष्टवाक्येनैव सर्वधर्मानुष्ठानं कर्तव्यं॥ तत्र यदि कदाचित्क्वचित्तच्छिष्टवाक्येपि श्रुतिस्मृत्यादिविरोधः
स्यात्तर्हि तच्छिष्टवाक्यपरित्यागे शिष्टविरोधो न स्यात्॥ सकलशिष्टानां सकलश्रुतिस्मृतिज्ञानस्याशक्य
त्वात्॥ न हि सर्वः सर्वं वेत्तीति न्यायात्॥ न श्रुतिस्मृत्यादिविरोधः शिष्टानामभीष्टः॥ तेषामेव तन्मूलकत्वात्
अत एव स्वसिद्धांतप्रमाणार्थप्रकरणे श्रुतिस्मृत्यादिवाक्यान्युदाहृतानि॥ तत्र तत्रापि विरोधपरिहारा
र्थमात्रमेवं श्रुतिस्मृत्याद्यविरोधान्न्यायावलंबनेनैव शिष्टवाक्योक्तिदर्शनात्॥ तत्र यदि कश्चित्पुरुषध
र्मत्वात् अतिवरो न श्रुतिस्मृत्यादिविरोधस्तन्नानुष्ठेयमिति॥ पूर्वोक्तहेतुबलात्॥ अन्यथा तातस्य कूपोय
मिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबंतीति वक्तव्यं॥ विशेषस्तु भारद्वाजसंहितायां परिशिष्टे [illegible]
याध्याये॥ गतानुगतिका मूढा नश्यंति [illegible]॥ इत्युक्तं तस्य॥ नात्र शिष्टवाक्यानुरूपा श्रुतिस्मृतिर्वा क
ल्पनीया॥ अनुमानेन प्रत्यक्षविरोधस्यान्याय्यत्वात्॥ [illegible]
[illegible]॥ नन्वस्मच्छिष्टानुदाहृतवाक्यमेव कथं न कल्पितमिति चेन्न॥ नान
निबंधोद्धृतत्वेन प्रामाण्यात्॥ न च जीर्णनिबंधानामेव प्रामाण्यं॥ पूर्वपूर्वापेक्षया नवीनतया सर्वनिबं

धानामप्रामाण्यापत्तेः॥ नात्र वैष्णवस्मार्तदलत्वयाः स्वस्वशिष्टकृतनिबंधानामेव प्रामाण्यमिति वा
च्यं॥ पक्षपातस्यान्याय्यत्वात् स्वशिष्टकृतनिबंधेऽपि क्वचिदन्यकृतनिबंधोध्धृतवाक्यदर्शनाच्च॥ ना
त्र निबंधोध्धृतवाक्यानामेव प्रामाण्यं॥ निबंधानुद्धृतानामप्यविशिष्टश्रुतिस्मृतिपुराणेतिहा
सागमेषु प्रत्यक्षपठ्यमानवाक्यानामप्रामाण्यापत्तेः॥ तस्मात्सर्वनिबंधोध्धृतवाक्यानामनुद्धृतप्र
त्यक्षमूलग्रंथे पठ्यमानवाक्यानामपि न्यायावलंबनेनैव प्रामाण्यमिति गम्यते॥ किंचात्र शिष्यैः स्वा
चार्याणामपि शास्त्रोक्तानुसारेणाज्ञा न कर्तव्यमित्याह स्कंदपुराणे चातुर्मास्यमाहात्म्ये जाबालिवा
क्येनैव॥ पुत्रेणापि पिता शास्यः शिष्यैर्वापि गुरुः स्वयं॥ क्षत्रियैर्ब्राह्मणः शास्यो भार्ययापि च पतिस्तथा
॥ उन्मार्गगामिनं श्रेष्ठमपि वेदांतपारगं॥ नीचैरपि प्रशास्येत श्रुतिराह सनातनी॥ सन्मार्ग एव सं
सेव्यः सन्मार्गो मोक्षदायकः॥ सन्मार्ग एव सर्वत्र पूज्यते नापथः क्वचिदित्यादि॥ इत्येवं सत्याचार्यैरुक्त
नीचाद्यपि शास्त्रानुसाराद्यथोक्तं गृहीतव्यमेव॥ अपि बालादपि सुभाषितं ग्राह्यमिति न्यायात्॥ मध्य
ग्रहणे महाकोछिर्न विचारणीयमिति न्यायाच्च॥ बालादपि हितं ग्राह्यं अमेध्यादपि कांचनं॥
नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुःकुलादपीति नीतिशास्त्रोक्तेश्च॥ रामनाममाहात्म्यनामके निबंधेऽव
सिष्टवचनमपि॥ युक्तं युक्तमुपादेयं वचनं बालकादपि॥ अन्यत्तृणमिव त्याज्यमित्युक्तं पद्मसं ५
भवः॥ इति॥ अत एव महाभारते शांतिपर्वणि मोक्षधर्मे॥ याज्ञवल्क्यः उवाच॥ ज्ञानान्मोक्षो जायते
पुरुषाणां नास्त्यज्ञानादेवमाहुर्द्विजेंद्राः॥ तस्मात्ज्ञानं तत्त्वतोऽन्वेषितव्यं॥ तेनात्मानं मोक्षयेऽजन्ममृ

त्योः ॥ १ ॥ आप्य शूद्रान्नं क्षत्रिया ब्राह्मणं वैश्या शूद्रादपि नीचाद्वा नीचादपि ॥ अधातव्यं श्रध्धानेन नित्यं नश्रधा
न्मजन्ममृत्यु विशोतामित्यादि ॥ ननु धर्मचरणी यथा क्षीरमपेयं ब्राह्मणादिभिः ॥ तद्वच्छूद्रमुखाद्वाक्यं न श्रो
तव्यं कदाचन ॥ इत्यादिवाक्यानुरोधात्कथं ब्राह्मणादिभिः शूद्राद्ग्राह्यमिति चेदुच्यते ॥ तन्निषेधं वैष्णव
व्यतिरिक्तपर इत्यविरोधः ॥ अन्यथा पूर्वोदाहृत भारत वाक्यविरोधात् ॥ विधिस्पृष्टे निषेधानवकाश
इति न्यायाच्च ॥ विष्णुभक्तः शूद्राणां तु न शूद्रः स्वामिन्यत्र राम नाम माहात्म्ये नामके निबंधे पद्मपुराणवच
नमुदाहृतं तथा ॥ न शूद्रा भगवद्भक्ता विप्रा भागवता मता ॥ सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने ॥
अत एवावैष्णव ब्राह्मणस्य शूद्रत्वादित्यभिप्रेत्य तन्निंदति तथा हि हारितस्मृतौ षष्ठाध्याये ॥ हा
रितोवाच ॥ वैष्णवानेव विप्रास्तु सर्वकर्मसु योजयेत् ॥ सर्वत्रावैष्णवान् विप्रान् पतितानपि संत्यजे
त् ॥ शंखचक्रविहीनस्तु देवतांतरपूजकाः ॥ द्वादशीविमुखा विप्राः शैवाश्चावैष्णवाः स्मृताः ॥ अवै
ष्णवानीस्यैसर्गात्पूजनाद्दर्शनादपि ॥ याजनाध्यापनात्संघो वैष्णवत्वाच्च्युतो भवेत् ॥ पद्मपुराणे
उत्तरखंडेपि ॥ किमत्र बहुनोक्तेन ब्राह्मणा येह्य वैष्णवाः ॥ न प[illegible]ष्टव्याः न वक्तव्या न द्रष्टव्याः कदा
चन इति ॥ तथा स्कंदपुराणे उत्तरखंडेपि तृतीयाऽध्याये ॥ अवैष्णवानामभ्यंगात्पूजनाद्दर्शनादपि ॥
यजनाध्ययनात्संघोन्त्ययं ते वैष्णवा नराः ॥ इति ॥ तथा भारद्वाजसंहितायामपि चतुर्थोऽध्याये ॥
भारद्वाजोवाच ॥ न किंचित्प्रतिगृ[illegible]ह्णीयात् विष्णुभक्तिविवर्जितात् ॥ पानीयं पयकमन्नं च विशेषे

णापि वर्जयेत्॥ न किंचिदिति॥ विष्णुभक्तिविवर्जितात् किंचिदपि न प्रतिगृह्णीयात्॥ पानियप
क्वान्नं विशेषेण वर्जयेत्॥ पापाधिक्यादिति भावः॥६७॥ विद्यार्थः संप्रयोगोपि शाक्तैर्न कर्हिचन॥
विवादोपि न कर्तव्यः क्रीडासंकथनानि च॥ विद्यार्थ इति॥ विद्यार्थः संप्रयोगो ह्यध्ययनाध्यापना
लक्षणः विवादः तत्वनिश्चयफलको वादः ज्ञानसंरक्षणार्थं जल्पवितंडे कार्ये बीजप्ररोहसंरक्षणा
र्थं कंटकशाखावरणवदित्यक्षपादेन जल्पवितंडयोरनुज्ञानात्॥ यथाविवादः वृथाकलहः क्रीडा
संकथनं साहचर्यात्॥ क्रीडासंकथनानि इष्टालापाः॥ इति मध्वाचार्यकृतब्रह्मसूत्रभाष्योद्धृत
ब्रह्मतर्कवचनं॥ अवैष्णवस्य वेदेपि ह्यधिकारो न विद्यते॥ गुरुभक्तिविहीनस्य शमादिरहितस्य च॥
न च वर्णावरस्यापि तस्मादध्ययनान्वितः॥ ब्रह्मज्ञाने तु वेदोक्ते ह्यधिकारी सतां मत इति॥ कि
मत्र भूयसोक्तेन तत्रभवदादिषु ब्राह्मणत्वं चर्स्मे भवतीत्यादि हेतुवादवचनैव कुमशक्तौ॥ पुराणं मा
नवो धर्मः सांगो वेदश्चिकित्सितं॥ आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः॥ इति हेमाद्रि
निबंधोद्धृतस्मृत्यंतरवाक्यात्॥ शास्त्रप्रमाणेनैव ब्राह्मणोप्यपि ब्राह्मणत्वमिति विश्वासात्॥
अन्यथा सर्वत्रोच्छेदप्रसंगात्॥ किं चात्र बहुनोक्तेन नाभरकोशबालभारतादि जैन्यकृतग्रंथा ६
नी यज्ञोपवीतानंतरं आदावेव विद्यार्थिनेण युष्मत्परं परादर्शिना ध्यस्माकं किमपि वक्तुमशक्तौ
यदि किमत्र बाधकं आबालादपि भाषितं ग्राह्यमिति न्यायादिति श्रूरो तद्दिक्कृते प्रयोगो क्रियते॥